1088

॥अथभट्टोजीदीक्षितकृताष्टिकारंभः॥पत्र०५॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

आन्हिक ॥२॥

श्रीगणेशायनमः॥ अथ माधवीये कूर्मपुराणे॥ब्राह्मे मुहूर्तउत्थाय धर्ममर्थं चचिंत येन्नाकायक्लेशनइद्रनेध्यायीतपरमेश्वरमिति॥सूर्योदयात्पागर्धघटरेद्वेमुहूर्तौ तत्रायोब्राह्मः॥द्वितीयोरौद्रः॥तदुक्तंविष्णुपुराणे॥रात्रेःपश्चिमयामस्यमुहूर्तौयस्तृतीयकः॥सब्राह्मइतिविज्ञेयोविहितःसर्वबोधनइति॥तत्रसापेक्षायश्चिन्मुक्तस्तिचंडिकायां॥ब्राह्मेमुहूर्तेयानिद्रासापुण्यक्षयकारिणी॥तांकरोतितुयोमोहात्सदक्लेशेनशुध्यतीति॥तत्रचिंतनीयमर्थविशेषेदर्शयतिविष्णुः॥उत्थायोत्थायबोद्ध्यंकिमद्यसुकृतंकृतोदनंगारायितंवाविवाकृतत्याद्याविभाविता॥उत्थायोत्थायबोद्ध्यंमहद्भयमुपस्थितं॥मरणव्याधिशोकानांकिमद्यनिपतिष्यतीति॥ततोविष्णुंस्मरेत्॥शयनादुत्थितोयस्तुकीर्तयेन्मधुसूदनं॥कीर्तनात्तस्यपापानिनाशमायांत्यशेष ॥२॥

तः॥इतिस्मरोक्तेः॥ततोयथासंभवंगजेंद्रमोक्षादिस्मरेत्॥अथभूपार्थना॥समुद्रवसनेदेविपर्वतस्तनमंडले॥विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे इति॥ततःश्रोत्रियादिकमवलोकयेत्॥तत्रपापिष्ठादिकं॥तदाहकात्यायनः॥श्रोत्रियंसुभगंगांचअग्निमग्निचिंतथा॥षडुत्थायप्रपश्येद्यःसर्वपापैःप्रमुच्यते॥पापिष्ठंदुर्भगंचोर्ध्वनग्नमुल्कंतथासिकं॥षडुत्थायप्रपश्येत्तुलेरूपलक्षणमिति॥ततोमूत्रपुरीषोत्सर्गंकुर्यात्॥तदाहांगिराः॥उत्थायपश्चिमेयामेरात्रेरात्र्यर्धवोदकं॥अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा॥वाचंनियम्ययत्नेननिष्ठीवोच्छ्वासवर्जितः॥कुर्यान्मूत्रपुरीषेतुशुचौदेशेसमाहितइति॥तत्रतृणानिविशिनष्टियमः॥अयज्ञीयैरनाईश्चतृणैःसंछाद्यमेदिनीमिति॥तृणयज्ञंकांडादेरप्युपलक्षणं॥तथाचस्मृ

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

आह्निक ॥२॥

निवंद्रिकायोपमः॥निरस्तयोरेकाधंपवंलोंधंतृणानिवा॥नियम्यप्रयतोवाचंसं
वीतांगोवगुंठितइतिं॥निरस्तरणंतर्यानं॥संवीतांगोवेष्टितदेहः॥अवगुंठितः
पाहृतशिराः॥तत्रतत्रकालभेदेनियममाहयाज्ञवल्क्यः॥दिवासंध्यासुकर्णस्थ
ब्रह्मसूत्रउदङ्मुखः॥कुर्यान्मूत्रपुरीषेतुरात्रौचेद्दक्षिणामुखइति॥कर्णश्चदक्षिणः॥
पवित्रंदक्षिणेकर्णेकृत्वाविण्मूत्रमुत्सृजेदिति॥स्मृत्यंतरेपवित्रस्थदक्षिणकर्णस्थो
नाभिधानाद्यज्ञोपवीतस्यापिनदेवन्यायमितिमाधवादयः॥स्थानांतरमप्याहांगि ॥२॥
राः॥कृत्वायज्ञोपवीतंतुदृष्टतःकंठउंबिनो॥विण्मूत्रंतुग्रहीकुर्यायद्वाकर्णसमाहित
इति॥तत्रकर्णनिधानमेकवस्त्रविषयं॥तदाहसांख्यायनः॥यद्येकवस्त्रोयज्ञोपवीतं
कर्णेकृत्वामूत्रपुरीषोत्सर्गंकुर्यादिति॥यमादेशार्थश्चिन्नमाहभरद्वाजः॥मलमूत्रं

त्यजेद्विप्रोविस्मृत्येवोपवीतंधृत्वान्यदध्यादन्यंनवंनदेति॥यत्तुदे
वलवचनं॥सदैवोदङ्मुखःस्नानंसायाद्धदक्षिणामुखइति॥तत्रस्नानंसायाद्धरा
त्रौदिवारात्रिविषयंविनिमाधवपारिजातकारादयः॥यदपियमवचनं॥प्रत्यङ्मु
खस्तूष्णंपरावृत्तेपराङ्मुखस्तथा॥उदङ्मुखस्तूभध्याह्नेनिशायांदक्षिणामुख
इति॥तत्रापिप्रत्यङ्मुखत्वप्रत्यङ्मुखत्वोक्तिःसूर्याभिमुखत्वनिषेधपरेतिमाधवादयः॥
उक्तंचमहाभारते॥प्रत्यादित्येप्रत्यक्षेचनिगच्चतिद्विजे॥मेहंतियेचपथिस्थिते
भवंतिगतामुषइति॥केचित्तुयमोक्तप्राक्प्रत्यङ्मुखताभ्यांसहयाज्ञवल्क्यो द्यु क्
स्योदङ्मुखत्वस्यविकल्पइत्याहुस्तन्न॥सामान्यविशेषशास्त्रयोर्विकल्पायोगात्॥दि
वसेकृत्स्नेपुदङ्मुखताविधायकंहियाज्ञवल्क्यीयंसामान्यशास्त्रं॥यमवचनंविशेषशा

आह्निक ॥३॥

स्त्रं॥उदश्नुवतस्यमध्याह्नविषयत्वेनसंकोचप्रतीतेः॥नचास्मिन्विशेषेसामान्यस्यो
पसंहारस्तर्हिस्यादितिवाच्यं॥देवलेनसदैवेतिविशेषणात्॥नहिस्मृत्यर्थस्यविधेरुपसं
हारः॥सामान्यविधिरस्मृत्यर्थःसंध्येनविशेषतः॥स्मृत्यर्थस्तुविधेर्नान्येरुपसंहारसं
भवइतिभट्टाचार्योक्तेरितिदिक्॥यत्तुदेवलेनोक्तं॥विष्मूत्रमाचरेन्नित्यंसंध्यासुप
रिवर्जयेदिति॥तंनिरुद्देनरविषयान्नवेगंधारयेन्नोपरुद्धःक्रियांकुर्यादितिस्मरणा
त्॥यत्तुमनुनोक्तं॥छायायामंधकारेवारात्रावहनिवाद्विजः॥यथासुखमुत्सृजेत्कुर्मा ॥३॥
त्राणबाधभयेषुचेति॥तंनीहारांधकारजनितदिग्मोहनविषयं॥देशनियमोवि
ष्णुपुराणेभिहितः॥नैर्ऋत्यामिषुविक्षेपमनीत्याभ्यधिकंभवः॥इरादावसथान्मू
त्रपुरीषंचसमाचरेदिति॥आपस्तंबोपि॥आरादावसथान्मूत्रपुरीषेकुर्यादक्षिणो

दिशं दक्षिणापरांवेति॥दक्षिणस्याअपरस्याश्चांतरालंदक्षिणापरा॥तांगत्वेतिशेषः॥
एतच्चाहर्विषयंतथाचापस्तंबः॥अस्मिन्नेवहिर्यामादारादावसथाद्वामूत्रपुरीष
योःकर्मवर्जयेदिति॥वर्जदेशास्तुमनूक्ताः॥नमूत्रंपथिकुर्वीतेत्यादिस्नानकृत्यक
रणेउक्ताः॥आपस्तंबः॥नचसोपानत्कोमूत्रपुरीषेकुर्यादिति॥सायणीयेतुगृहीत्वा
जलपात्रंतुविष्मूत्रंकुरुतेयदिनस्नेमूत्रसदृशंपीत्वाचाचामेदायणंचरेदिति॥म
रीचिः॥ननग्नोनाईवस्त्रश्चकुर्यान्मूत्रपुरीषकोयदिमोहेनकुर्वीतपुनःस्नानेनशु
ध्यति॥ननोलोष्टादिनापरिमृष्टगुदमेहनोगृहीतशिश्नश्चोत्तिष्ठेत्॥तथाचभरद्वा
जः॥अथापरुष्यविष्मूत्रंलोष्टकाष्ठतृणादिना॥उदस्यवासाउत्तिष्ठेदृष्टविघ्नतमे
हनदृति॥उदस्यवासाः॥उत्क्षिप्यवासाः॥अत्रविशेषमाहहारीतः॥लोष्टेनपरिमृज्यात

आह्निक ॥४॥

शुष्ककाष्ठेनवागुदीच्यनुगोत्रमोक्ष्मेनपर्णलोष्टाश्मभिर्मृत्पुरीषाकर्षंकुर्यादि
ति॥तदश्वत्थादियज्ञियकाष्ठादिविषयमितिशिरिजातकारः॥ ॥इतिविष्णूक्तो
त्सर्गविधिः॥ ॥अथशौचविधिः॥तत्रदक्षः॥तीर्थेशौचंनकुर्वीतकुर्वीतोद्धत
गरिणेति॥अभ्युद्धरणासंभवेतुविशेषमाहविष्णुस्नात्वारात्रिमाचान्तःस्थलेत्यल्का
कूपोद्धोचमनुद्धृतेपश्चात्तोयंतीर्थमन्यथाह्यशुचिर्भवेदिति॥बहुमृद्विद्ध
स्तोरात्रिः॥तदुक्तंमरसिंहेरस्तोमृत्स्नातुबहुयात्॥सरात्रिस्यादरात्रिरूक्तनिष्कृति
र्नमृद्विनेति॥सःरात्रिश्छेदः॥शौचयोग्यांमृत्तिकामाहयमः॥आहरेन्मृत्तिकांवि ॥४॥
प्रःकूलान्नदीतटात्तथेति॥मरीचिः॥विप्रेशुक्लातुमृद्ग्राह्यारक्षत्रेविधीयते॥ह
रिद्रवर्णावैश्येतुशूद्रेकृष्णेतिनिर्दिशेदिति॥उक्तविशेषालाभेत्वाहमनुः॥यस्मिंदेशेतु

यत्रोर्ध्वंयाचतयत्रैवमृत्तिका॥सेवनत्वशास्त्रास्यान्नयाशौचंविधीयतइति॥विष्णु
रणेवर्ण्यामृद्विशेषादर्शिनाः॥वल्मीकमूषिकोत्खातांमृदमंनर्जलान्नथा॥शौचायशि
ष्टागेहान्नादद्याल्लेपसंभवात्॥अंतःप्राप्यवपंत्रोचदलोत्खातां
नकर्दमादिति॥अंतर्जलेमृत्तिकाग्रहणेधस्कावापीकूपादिव्यतिरिक्तवि
षयः॥अतएवयमः॥वापीकूपतटाकेभ्योहरेद्वाह्यतोमृदं॥आहरेज्जलमध्यात्तु
परतोमणिबंधनात्॥आरण्यकेभ्यस्त्वेवंस्याद्ग्राम्येभ्याहरणंविदुरितिदेवलः॥आह
तामन्यशौचार्थमादद्यान्नमृत्तिकामितिहस्तनियममाहदेवलः॥धर्मविद्भिर्ण
हस्तमधःशौचेनयोजयेत्॥तथाचवासहस्तेननाभेरूर्ध्वंनशौधयेदिति॥ब्रह्मोउप
रागेदिद्विगुणोमिहितः॥उद्धृत्योदकमादायमृत्तिकांचैववाग्यतः॥उद्धृत्योद्धृत्यवाकुर्या

द्वाचौचेदक्षिणासुरवदंतिास्त्रंस्यासादशानानप:॥एकालिंगेकरेनिस्त्रउभयोर्मृ
दयंस्मृतं॥पंचापानेदशैकस्मिंनुभयो:सप्तमृत्तिकादंति॥अत्रपूर्वार्धमूत्रशौचवि
षयं॥उत्तरार्धंतुपुरीषशौचविषयंबोध्यं॥उदाहृतशातानपवचनाद्यनुरोधात्॥
माधवीये॥एकालिंगेगुदेनिस्त्रस्त्रथैकत्रकरेदश॥उभयो:सप्तदातव्यामृद:शुद्धि
मभीप्सतेति॥एवंचसंख्याविशेषेअधिकसंख्यामुख्य:कल्प:॥अल्पसंख्यात्वनुकल्प
इतिविवेक्तव्यं॥मूले॥एतच्छौचंगृहस्थस्यद्विगुणंब्रह्मचारिण:॥वानप्रस्थस्यत्रिगु
णंयतीनांतुचतुर्गुणं॥यद्विनाविहितंशौचंनदर्भैर्निशिकीर्तितं॥तदर्धमातुरेशौक ॥५॥
मातुरस्यार्धमध्वनि॥आदित्यपुराणे॥स्त्रीशूद्रयोरर्धमानंशौचंमनीषिभि:॥
रितंशौचस्यनित्यधर्मपथिपादंविधीयते॥आर्त:कुर्याद्यथाशक्तिशक्त:कुर्याद्यथोदितं॥

स्त्रीशूद्राणामशक्तानांबालानांचोपनीतिनां॥गंधलेपक्षयकरंशौचंकुर्यान्नसंख्यया॥
एकेकयामृदापादौहस्तौप्रक्षालयेन्नर:॥दक्ष:॥नशौचंवर्षधारासु नीचरेनु
कदाचने॥मरीचि:॥तिसृभिश्चानलानांतुशौध्योगुल्मानथैवच॥हस्तौत्वामणि
बंधाच्चलेपगंधापनुत्तयेदिति॥ऋष्यशृंग:॥धारासुशौचंनकर्तव्यंशौचसिद्धिमभीप्सता॥
चुलुकैरेवकर्तव्यंहस्तशुद्धिविधानत:॥यत्तुदक्षवचनान्न्यूनाधिकंनकर्तव्यं
शौचंशुद्धिमभीप्सतेति॥तत्तदुक्तसंख्यायाअर्वाक्तत्तन्मात्रोत्तागंधाद्यपगमनि
श्चयेवेदितव्यं॥तत्रापूर्वागंधाद्यपगमेसंख्यानियमोदृष्टार्थ:॥यत्रत्वूनसंख्योयंन
विधेरुपदिश्यतइति॥मनुरपि॥यावंतोपैत्यमेध्याक्तोगंधोलेपश्चतत्कृतं॥तावन्मृदा
रिरेयंस्यात्सर्वासुद्रव्यशुद्धिष्विति॥परकीयमलादिस्पर्शेतुविशेषमाह यम:॥परस्य

शोणितस्पर्शरहितो विण्मूत्रजेतथा॥चतुर्णामपिवर्णानां ह्यविंशन्मृत्तिकाःस्मृताइति॥
मृत्परिमाणमाहशातातपः॥आर्द्रामलकमात्रास्युर्यासारंडत्रयेस्थिताः॥तथैवाहु
तयःसर्वाःशौचेदेयास्तुमृत्तिकाइति॥शौचेति॥मूत्रशौचेइतिपाठिजानतः॥स्मृत्यर्थसारे॥
आर्द्रामलकमात्रातुमूत्रशौचेतुमृत्तिका॥मूत्रात्तुद्विगुणंशुक्रेमैथुनेत्रिगुणंस्मृतमि
ति॥गुदशौचेप्रमाणंतरमाहदक्षः॥प्रथमाप्रसृतिर्ज्ञेयाद्वितीयातुतदर्धिका॥तृतीया
मृत्तिकातेयात्रिभागकरसंमिता॥विष्णुस्तु॥अर्धप्रसृतिमात्रातुप्रथमामृत्तिकास्मृ
ता॥द्वितीयाचतृतीयाचतदर्धार्धप्रकीर्तिते॥शौचानंतरंकर्तव्यमाहविश्वामित्रादि ॥६॥
शंतनरगतोविप्रःक्षालयेन्नचभूतले॥शौचशेषामृदंतोयैर्नहिप्रक्षालयेद्यदि॥अशेषात
स्यपितरस्तामश्नंतिनसंशयः॥देशांतरगतः॥प्रदेशांतरस्थःसन्॥शौचविलंबेतुस

चेलंस्नानंकुर्यात्॥तदाहसंवर्तः॥कृत्वामूत्रंपुरीषंवायदानेवोदकंलभेत्॥स्नात्वा
लब्धोदकःपश्चात्तचैलंविशुध्यति॥इति॥अथपादप्रक्षालनंस्मृतिदीपिकायां॥
प्रथमंपादमुत्सृज्यस्थित्वापादौप्रक्षालयेत्ततः॥नहस्तेनैवसंजघ्नेन्नात्मानमवलोक
येत्॥तत्रैवमृद्विशेषाहप्रक्षाल्यचरणौपथक्॥हस्तावमणिबंधाच्चकुर्यादाचमनं
ततइति॥आपस्तंबस्तूपत्यकृपादावनेजनमित्याह॥आचमनप्रकारोनगंडूषानां
हआचार्यः॥कुर्याद्दादशगंडूषान्पुरीषोत्सर्जनेद्विजः॥मूत्रेचतावत्स्युर्भोजनांतेतु ए५
षोडशेति॥मूले॥मृदाद्वेणशुद्धिःस्याद्गौचेनैवनचान्यथा॥यस्यशौचेपिशैथिल्य
हृन्नंतस्यपरीक्षितेति॥शौचेयत्नःसदाकार्यःशौचमूलोद्विजःस्मृतः॥शौचाचारविहीन
स्यसमस्तानिष्फलाक्रियाइति॥सर्वेषामेवधर्माणांशौचपूर्वंविधीयतइति॥उक्तनियमा

आ० क० ॥७॥

निक्रमेद्वायश्चिन्नमुक्तंस्मृतिरत्नावल्यां॥गायत्र्यष्टशतंचैवप्राणायामत्रयंतथा॥ज्ञा
यश्चिन्नमिदशोक्तंनियमानिक्रमेसतां निं॥व्यासस्मृ॥अपवित्रैःवासर्वाविस्त्रोगतोपि
वा॥यस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरश्शुचिरिति॥ ॥इतिशौचं॥ ॥अथाचमनविधिः॥
यात्रवल्क्यः॥अनर्जानुभुचौदेशेउपविष्टउदङ्मुखः॥ज्ञात्वाब्राह्मेणतीर्थेनद्विजो
नित्यमुपस्पृशेदिति॥अंगुष्ठमूलस्यतलेब्रह्मतीर्थंप्रचक्षते॥कनिष्ठादेशिन्यंगुष्ठमूलाग्रयंकरस्यच॥प्राजापतिंपितृतीर्थंदेवतीर्थं
न्यतःकरात् इति॥करमध्येसोम्यमग्नितीर्थंच॥तत्रसोम्येननवान्नाशनानि॥आ
ग्नेयेनत्रतिग्रहंकुर्यात्॥आचमनीयमुदकंविशिनष्टि॥शंखः॥अद्भिःसमुद्गताभि
रूद्गीताभिःफेनबुद्बुदैः॥वह्निनाचनमानिरक्षारामिरुपस्पृशेत इति॥यमोपि॥अपः ॥७॥

करनखस्पृष्टायआचामतिवैद्विजः॥सुरांपिबतिसत्यंयमस्यवचनंतथेति॥मनुः॥
इद्गाभिःपूयतेविप्रःकंठगाभिस्तुभूमिपः॥वैश्योद्भिःप्राशिताभिस्तुभूद्भिस्पृष्टाभि
रंततइति॥पित्र्येनाअपि॥अनुष्णाभिरफेनाभिःपूताभिर्वस्त्रचक्षुषा॥हृद्गताभिरशुद्धी
भिस्त्रिभिस्तुवाद्विराचमेदिति॥त्रिश्चतुर्वैत्यैछिकोविकल्पइतिमाधवः॥यत्रसमंच
कुशाचमनंविहितंतत्रतेनसहचतुः॥अन्यत्रत्रिरितिव्यवस्थेति हरदत्तः॥यमः॥
राज्ञावलोक्षितेनापिशुद्धिरुक्तामनीषिणां॥उदकेनानुरागंचतथोच्छेनोच्छपायि
नामिति॥भरद्वाजः॥आयतंसर्वतःकृत्वागोकर्णाकृतिवत्करं॥संहतांगुलिनातोयं
गृहीत्वापाणिनाद्विजः॥मुक्तांगुष्ठकनिष्ठेनशेषेणाचमनंचरेत्॥मार्षमज्ञानमात्रास्रं
संगस्यत्रिःपिबेदपइति॥आचमनविधिंचतुर्भिःश्लोकैराह मूलिकाराः॥प्रक्षाल्यपादौहस्

आ० क
॥८॥

स्तोचत्रिःपिबेदंबवीक्षितंसंमृज्यांगुष्ठमूलेनहिःपमृज्याननोमुखं॥संहताभिस्त्रिभिः
पूर्वआस्यमेवमुपस्पृशेत्॥अंगुष्ठेनप्रदेशिन्याघ्राणंस्पृशेत्तनंतरं॥अंगुष्ठानामि
काभ्यांतुचक्षुःश्रोत्रेततःपरंकनिष्ठांगुष्ठयोर्नाभिंहृदयंतुतलेनवै॥सर्वाभिश्शि
रःपश्चाद्बाहुचायेणसंस्पृशेत्॥अनेनैवविधानेनआचांतःशुचितामियादिति॥अ
स्यार्थः॥त्रिःपीत्वातुतःसंमृज्यहस्तौप्रक्षाल्यांगुष्ठमूलेनालोमकेनमुखंद्विःपरि
मृज्यात्॥एवमितिपुनर्हस्तौप्रक्षाल्येत्यर्थः॥संहताभिस्त्रिभिर्वक्ष्यमाणान्मुखं मुख ॥८॥
सकृदवमृज्यात्॥एवंसर्वत्रमध्येहस्ताभ्यामपउपस्पृशेत्॥बाहूचेतिबाहुमूलेसर्वा
गुल्यग्रैःस्पृशेदित्यर्थः॥स्फुटंचैतत्स्मृत्यर्थसारे॥अशक्तौत्रिःपीत्वाहस्तौप्रक्षाल्यश्रो
त्रंस्पृशेदितिपक्षान्तरंतत्रैवोक्तं॥प्रयोगपारिजातेव्याघ्रपादः॥केशवादित्रिभिःपीत्वा

चतुर्थेनमृजेत्करं॥पंचमेनचषष्ठेनद्विरोष्ठावुन्मृजेत्क्रमात्॥तोसप्तमेनाभिमृजेत्त
एकयातुमंत्रवित्॥अष्टमेनतुमंत्रेणाभिमंत्र्यजलंशुचिः॥वामंसंशोक्षयेत्पाणिं म
नुनानवमेनच॥दक्षिणंदशमेनांघ्रिंवाममेकादशेनवै॥मूर्धानंद्वादशेनाथस्पृशे
दूर्ध्वोष्टषट्कं॥संकर्षणायनमइत्यनेनांगुलिमूर्धभिः॥अंगुष्ठतर्जन्यग्राभ्यांसं
श्लिष्टाभ्यांजलैःसह॥नासारंध्रेवासुदेवषण्मुखाभ्यांस्पृशेच्छुभे॥अंगुष्ठानामिकाभ्यांतु
संश्लिष्टाभ्यांजलैःसह॥अनिरुद्धायनमइतिसंस्पृशेद्दक्षिदक्षिणं॥पुरुषोत्तममंत्रेण
नाभ्यांवामंस्पृशेद्दृशं॥तथांगुष्ठकनिष्ठाभ्यांश्लिष्टाभ्यांजलैःसह॥अधोक्षजनृसिं
हाभ्यांश्रोत्रेहृदंस्पृशेत्क्रमात्॥नाभिमच्युतमंत्रेणताभ्यामेवस्पृशेद्भुवः॥श्रीजनार्द
नमंत्रेणतलेनहृदयंस्पृशेत्॥उपेंद्रायेतिमूर्धानंस्पृशेत्सजलपाणिना॥सर्वांगुल्यग्रभा

गेरूक्षसमाश्लिष्टैर्जलैः सहाभ्युक्षेत्तु हरिरुक्षाभ्यांसंस्पृशेद्दक्षिणेनसोऽआचामेन्नित्य
मेवंयोभगवन्नामभिः कर्मणाऽसंयः पूतःसविद्विनेऽन्नरेऽधिकारवानिति॥एवंस्त्री
त्यंतरेऽपक्कारंनराण्युक्तानि॥तेषांयथाशास्त्रव्यवस्थेतिमाधवः॥मूलेऽकृत्वापा
दशौचंतुनिषन्नऊरुशिरोपिवा॥विनायज्ञोपवीतेनआचांतोऽपशुचिर्द्विजः॥आचां
तोऽपीमेचत्वारोशुचयः॥अकृतपक्षौचः॥तथानिषन्नऊरुशिरः॥यज्ञोपवीतहीन
श्चेत्यर्थः॥आचमननिमित्तान्याह यमः॥उन्मीलेदकमाचामेद्वमतीर्यनथैवचेति॥
हसतिः॥अथोवायुसमुत्सर्गेआक्रंदेक्रोधसंभवे॥मार्जारमूषकस्पर्शेपरहासेन्ह
नभाषणे॥निमित्तेष्वेषुसर्वेषुकर्मकुर्वन्नुपस्पृशेदिति॥याज्ञवल्क्योपि॥स्नात्वापीत्वा
क्षुतेभुक्त्वास्थ्योपसर्पणे॥आचांतःपुनराचामेद्धासेविपरिधायचेति॥विड्वेणेव

नुसंस्पृष्टउच्छिष्टेनकथंचन॥आचम्यैवतुशुद्धःस्यादापस्तंबोब्रवीन्मुनिरिति॥आच
मनासंभवेतु॥कुवरीतालंभनंवापिदक्षिणश्रवणस्यचिनिमार्जनेयोक्तोध्यं॥
नखांविसृज्यपरिधायोपस्पृशेदाईतृणंभूमिंगोमयंवासंस्पृशेदितिबोधायनोक्तं
द्रष्टव्यं॥देवलः॥भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत्॥दंतलग्नमसंहार्यंलेपंम
न्येनदंतवत्॥नतत्रबहुशःकुर्याद्यत्नमुद्वरणेपुनः॥भवेच्चाशौचमत्यर्थंतृणवेधाद्रु
णेरुतेः॥दंतवदितिरसान्नपलब्धिविषयकंबोध्यं॥तदाहशंखः॥दंतवद्दंतलग्नेषु
रसवर्जमन्यत्रजिह्वामिमर्शनात्॥फलारोविशेषमाहशातातपः॥दंतलग्नेफलेमू
लेभक्ष्येहावशिष्टकेतांबूलेचेक्षुदंडेचनोच्छिष्टोभवतिद्विजरिति॥गौतमः॥नमुख्यो
विप्रुषउच्छिष्टंकुर्वंतिनचेदंगेनिपतंतीति॥मनुः॥स्पृशंतिविंदवःपादौयस्याचामयत

आ० क
॥२०॥

परान्॥भौमिकैस्तेसमाज्ञेयाननैरयतोभवेदितिपादग्रहणमविवक्षितोऽथ
चयमः॥षण्मांत्याचामतोयाश्चशरीरेविशुषोनृणां॥उच्छिष्टदोषोनास्त्यत्रभूमितुल्या
स्मृताःस्मृतइति॥आपस्तंबः॥नश्मश्रुमिरुच्छिष्टोभवत्यंतरास्येसद्यिर्यंनहस्ते
नोपस्पृशतीति॥वसिष्ठः॥वेदाभ्यासेवरंज्ञानाःशुद्धाएवतुविशुषाःश्मश्रुचास्यग
तंशुद्ध्यतेनतुसंस्पृशेदिति॥गौतमः॥नखिंनुद्धृतोदकेनाचामेदिति॥हरदत्तस्तु
विषयेजलेतुखिंनत्याचामेत्॥तदाहविष्णुः॥जानोरूर्ध्वंजलेखिंनात्वाचांतःशुचि
र्नामियात्॥अथस्थाऊनरूपोपिसमाचांतोनशुध्यतीति॥हारीतः॥आर्द्रवासाजले ॥२०॥
कुर्यात्तर्पणाचमनंजपं॥शुष्कवासास्थलेकुर्यात्तर्पणाचमनंजपमिति॥कौशिकः॥
अपवित्रकरःकश्चिद्ब्राह्मणंपंउपस्पृशेत्॥अकृतंतस्यतत्सर्वंभवत्याचमनंतथा॥

वामहस्तस्थितैर्दर्भैर्दक्षिणेनाचमेद्यदि॥रक्तंतुनद्रवेत्तोयंपीत्वाचांद्रायणंचरेदि
ति॥हस्तहृत्यपवित्रंचशंखनिर्गोमिलः॥उभयत्रस्थितैर्दर्भैःसमाचामतियोद्विजः॥
सोमपानफलंतस्यशुक्रायज्ञफलंभवेदिति॥स्नानानंतरमाविन्याचमनेविशे
षमाहदक्षः॥स्नात्वाचामेत्सदाविप्रःपादौकृत्वाजलेस्थलेउभयोरप्यसौशुद्ध्य
तःक्षेमीभवेदिति॥समेवार्थमाहमूले॥जलेजलस्थोनाचामेज्जलाचांतःस्थलेशु
चिः॥पादौस्थाप्योभयत्रैवआचांतःशुचिनामियात्॥जलाचांतीयस्मात्स्थलेशुचिर्न
भवतितस्माज्जलेआचमनंनकुर्यादित्यर्थः॥स्थाप्येतिआर्षोत्वम्॥उभयत्रजल

स्थलयोरित्यर्थः॥अत्रैवविशेषःपारिजातेविन्यस्यदक्षिणंपादंजलेवामपदंबहिः॥

आ० क
॥२१॥

उपवीतीसमाचामेद्द्विरेवसनातनइतिमाधवीयेआलाबुनाम्रपात्रेचकरकं
चकमंडलौएहीतास्वयमाचामेन्नतेनापयतोभवेदितिप्रयोगपारिजातेतुवि
शेषःस्मर्यतेकरकालाबुपात्रेणनाम्रचर्मपुटेनचाएहीतास्वयमाचामेद्भिल
क्षेननान्यथेतिनतथानत्रैवाभ्रद्वाहनैस्मृताचामेदेकपाण्याहनेस्मथाननचैवा
त्रनहस्तेननापरिधानहस्तनइतिअबतोअनुपवीतः॥ इत्याचमनप्रकरणं॥
अथदंतधावनविधुः॥कंटकिक्षीरवृक्षोत्थंद्वादशांगुलमत्रणाकनिष्ठांगुलिव
त्स्थूलंपर्वार्धकृतकूर्चकंदंतधावनमुद्दिष्टंनिस्नेत्रेखनिकातथेतिव्यासः॥सु
सूक्ष्मंसूक्ष्मदंतस्यसमदंतस्यमध्यमांस्थूलंविषमदंतस्यत्रिविधंदंतधावनमि
तिआश्वलायनः॥एवमाचम्यदंतानांकाष्ठेनविसृजेन्मलांश्चाक्षोदश्चखआसीनःशु

दश्चखएववा॥विनस्निग्धंसुद्दिष्टंदंतकाष्ठंद्विजन्मनां॥स्त्रीशूद्रयोस्तदर्धंस्यान्नानि
श्चकनजेतुवत्॥कनिष्ठांगुलिवत्स्थूलंतदयकृतकूर्चकमितिअंगिराः॥वक्षा
ल्यभक्षयेत्काष्ठंवक्षाल्येवतुसंत्यजेत्॥आयुरित्यादिमंत्रोयमृक्शाखाभिमंत्र
णंविनाभिमंत्रणंतूष्णीहथास्यादंतधावनंइतिआयुरितिमंत्रस्यात्रिरुक्षिः॥
वनस्पतिर्देवताअनुष्टुप्छंदःकाष्ठाभिमंत्रणेविनियोगः॥आयुर्बलंयशोवर्च
प्रजाःपशुवसूनिचब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पतेइत्यभिमंत्र्यउपरि
तनदंतानारभ्यत्रिर्मृजेत्॥ततऊर्ध्वकमेणैवधावयेच्छास्त्रयातयेत्यंगिरस्मरणं
॥ततःकाष्ठंवक्षाल्यनेर्मृत्योत्यजेत्॥राक्षस्यामुत्सृजेत्काष्ठमित्याश्वलायनस्मर
णात्॥काष्ठविशेषाश्चाश्वलायनेनोक्ताः॥सर्वेकंठकिनःपुण्याःक्षीरिणश्चयशस्विनः॥

तु
उडुंबरैर्वाकुसिद्धिलभेत्सक्षेणवैधनं॥अर्कजेनविरोगत्वंवटेनमहतीश्रियं॥
अपामार्गेसर्वसिद्धिःस्त्रीवश्यंचखदिरंगुभिः॥इत्यादिपारिजातादौविस्तरोवोध्यः॥
अथदंतधावनेवर्ज्यतिथयः॥आचार्यः॥अष्टम्योश्चचतुर्दश्योःपंचदश्योस्त्रिजन्म
सु॥व्यतीपातेचसंक्रांत्योर्दंतकाष्ठेनभक्षयेत्॥नद्याद्जीर्णवमथुश्वासकासज्वरा
र्दितः॥पुरोदयाद्वेल्वाद्यान्नोदितेसमितेरवौ॥दीक्षितोब्रह्मचारीचयतिश्चविध
वांगनां॥नित्यमद्यादंतकाष्ठमन्यांस्तुविवर्जयेदिति॥विष्णुः॥षष्ठितिपद्दर्शषष्ठीषु च
तुर्दश्यष्टमीषुच॥हादश्यांचनवम्यांचवर्जयेद्दंतधावनं॥यमः॥श्राद्धजन्मदिनेचैव ॥१२॥
विषाहेजीर्णदोषकेश्रुतेचैवोपवासेचवर्जयेद्दंतधावनं॥व्यासः॥अलाभेदंतकाष्ठा
नांनिषिद्धायांतथातिथौ॥अपाद्वादशगंडूषैर्विदध्याद्दंतधावनं॥स्मृत्यर्थसारेतु॥तृण

पर्णैर्मध्यमानामिकांगुष्ठैर्वानिषिद्धाहेपिकुर्युरितिस्मृतौ॥ ॥इतिदंतधावनं॥ ॥
अथपवित्रं॥व्यासः॥कुशैःस्नानंभवेत्स्नानंकुशैर्नोपस्पृशेद्द्विजः॥कुशैर्नचोद्वर्तनो
यंसोमपानेनसंमितं॥शंखः॥कुशाभावेद्विजश्रेष्ठाःशैवरैर्नतत्वतइति॥यमः॥
कुशाःकाशास्तथादूर्वायवाब्रीह्यएवच॥बल्वजाःपुंडरीकाणिसप्तधाबर्हिरुच्य
तइति॥पारिजातेपासिमास्याहतादर्भास्तन्मास्यैवचोदिताइति॥हारीतकात्या
यनौ॥पासेनभस्मयावास्यातस्यादर्भाश्चयोमतः॥अयातयामास्तेदर्भाविनियोज्याः
पुनःपुनरिति॥कात्यायनः॥अनंतगर्भिणंसायंकौशद्विदलमेवच॥पादेशमात्रंत्रि
तयंपवित्रंयत्रकुत्रचित्॥कुशानांस्त्रीपुंनपुंसकत्वविवेकस्तत्प्रकृतिनियोगवि
शेषपारिजातादेर्बोध्यः॥मार्कंडेयः॥चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं॥एकैकन्यू

नसुद्दिष्टं वर्णेवर्णेयथाक्रमं॥त्रिभिर्दर्भैः शांतिकर्मपंचभिःपौष्टिकंतथा॥चतुर्भिरभि
चारंस्कुर्वंकुर्यात्पवित्रकमिति॥अत्रिः॥ब्रह्मयज्ञेजपेचैवब्रह्मग्रंथिर्विधीयते॥
भोजनेवतुलंशौक्रमेवंधर्मोनहीयते॥पारिजातोहिमेनसर्वदासर्वान्कुर्यादेवाद्वि
चारयन्॥रौप्यंदक्षप्रदेशिन्यांविभृयाद्दीक्षितोद्विजइति॥दक्षादक्षिणानत्रैवा॥उन्न
रीयंयोगपट्टंतर्जन्यांरजनेनथा॥नजीवत्पितृकैर्धार्यं ज्येष्ठाविद्यतेयदीति॥कौ ॥छ५
शिकः॥शुचौदेशेसुविभूत्वास्थित्वाऽर्वोत्तरासुखः॥ओंकारेणैवमंत्रेणकुशान्स्प
ृष्ट्वाद्विजोत्तमः॥विरिंचिनासहोत्पन्नःपरमेष्ठीनिसर्गजः॥नुदपापानिसर्वाणिदर्भ ॥२३॥
स्त्वंकरोमम॥इमंमेवंसमुच्चार्यततःऽर्वोत्तरासुखः॥हुंफट्कारेणदर्भांस्त्रीन्स
ंछित्वासमुद्धरेदिति॥हेमाद्रौ॥अन्यान्यपिपवित्राणिकुशऽर्वोत्तराणिच॥हेमात्मक

पवित्रस्यकलांनार्हंतिषोडशीमितिति॥ ॥इतिपवित्रविधिः॥ ॥अथस्नानं॥
मूलं॥उषःकालेतुसंप्राप्तेशौचंकृत्वायथार्थवत्॥ततःस्नानंप्रकुर्वीतदंतधा
वनेऽर्वाक्मितिति॥अर्थःप्रयोजनंतद्योग्ययथार्थसफलंकर्मा॥तद्धेयथार्थव
त्॥अहर्यैवेतिति॥सांगमितिफलितोऽर्थः॥उपस्पृश्यसियत्स्नानंसंध्यायामुदितेपि
वा॥शंजापत्येनतत्तुल्यंसर्वपापप्रणाशनमितिति॥उदितेपिवेत्यनुकल्पः॥तत्र
पक्षेसंध्याप्रलुप्यते॥अतएवमुख्यकल्पेशक्तौपतितनिषेधतियोगयाज्ञवल्क्यः॥
संध्योसंध्यामुपासीतनास्तमेनोदितेरविमितिति॥अस्नात्वानाचरेत्कर्मजपहोमादि
कंक्वचित्॥लालास्वेदसमाकीर्णःशयनादुत्थितःपुमान्॥स्त्रियंतिहिसुप्तस्यइंद्रि
याणिस्रवंतिचा॥अंगानिसमतोयांतिचोन्मार्गंयथमैःसहा॥अत्यंतमलिनःकायोनक

छिद्रसमन्वितः॥स्ववत्येवदिवारात्रौयातःस्नानंविशोधनं॥यातःस्नानेशशंसंतिदृष्ट
दृष्टकरंहितत्॥सर्वमर्हतिशुद्धात्मायातःस्यायीजपादिकं॥गुणादशस्नानपरस्य
साधोरूपंचतेजश्चबलंचशौचं॥आयुष्यमारोग्यमलोलुपत्वंदुःस्वप्ननाशश्चय
शश्चमेधा॥स्नानंनदीदेवखातह्रदेषुचसरःसुचा॥पंचपिंडाननुद्धृत्यनस्नायात्य
रण्यारिणीति॥अत्रतृतीयचरणंस्यादृत्याश्वोनराभ्यांसंबंधोबोध्यः॥मूलशेष
लक्षसुवार्थः॥स्नानप्रकारस्त्वाहुर्मूले॥स्नानमप्येवतैर्मंत्रैर्वरुणेश्वमृदासहाकर्प
ह्याहेतिभिर्वाथयत्किंचेदमृचापिवा॥योगयाज्ञवल्क्यः॥तत्वायामीतिमंत्रेणवास्न
नंनदेस्थितः॥उद्वयंतमसस्परीतिस्मृत्वाघवतीर्यजलाशये॥आवाह्यवरुणंस्नानमा
चरेद्विधिपूर्वकमिति॥गंगावाक्यं॥नंदिनीनलिनीसीतामालतीचमहापगा॥विष्णुप

॥२४॥

दायसंभूतागंगात्रिपथगामिनी॥भागीरथीभोगवतीजाह्नवीत्रिदशेश्वरी॥हारशे
तानिनामानियत्रयत्रजलाशये॥स्नानोद्यतःस्मरेन्नित्यंतत्रतत्रवसाम्यहमिति॥
देवलः॥एकोनदीसमासाद्यनद्यास्नानंनदीस्मरेत्॥शंखः॥आपोअस्मानितिस्मृ
त्वाभास्करामिमुखःस्थितः॥इदंविष्णुर्जपित्वानुवतिस्रोनिमज्जति॥अथवाह्ल
दंकृत्वास्नानंविधीयतेबुधैः॥आदित्यामिमुखःकुर्यात्संध्यावंदनमेवच॥याज्ञ
वल्क्यः॥भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रवणोदकं॥ततोपिसारसंपुण्यंतस्मान्ना
देयमुच्यते॥तीर्थंतोयंततःपुण्यंततोगंगांबुसर्वतः॥मरीचिः॥भूमिष्ठमुद्धृतंवापि
शीतमुष्णमथापिवा॥गंगापयःपुनात्याशुपापमारण्यनिर्कृतिं॥शौनकः॥स्ना
तानांनदीवारिमध्येत्रिःपठेदघमर्षणमिति॥अनुकल्पमाहयोगयाज्ञवल्क्यः॥यएवत्रि

आ॰ क
॥२५॥

स्मृतः श्लोकः स्नानस्य विधिरुत्तमः॥असामर्थ्यान्नकुर्याच्चेन्नरो यो विधिरुच्यते॥स्नानमंत्र
र्जलेचैव मार्जनात्त्रयमेतथा॥जलाभिमंत्रणेचैव तीर्थस्य परिकल्पितं॥अघमर्ष
णसूक्तेनत्रिराहत्तेनतित्यशः॥स्नानाचरणमित्येतदुपदिष्टंमहात्मभिरितिसूत्रं॥
स्नानादनंतरंतावत्तर्पये ..पितॄदेवता॥उशन्तस्त्वेतिमंत्रेणदद्यात्संध्याकर्मणतः परमिति॥
पितृदेवतास्तृप्यंतामृषीणामुपलक्षणं॥कर्मण्यविक्षितः॥तेनदेवानृषीन्पितॄंश्चेत्य
र्थः॥देवर्षेःस्तर्पयेद्यस्तुपितॄंश्चैवसमाहितइति स्मृतेः॥एतच्चमाधवाद्युदाहृतपा
ठमनुसृत्यव्याख्यातं॥मूलेनुपादानंतरं॥देवानृषीन्पितॄंश्चैवजलमध्येतुतर्पयेत्॥
उत्तरार्धंतुउशन्तस्त्वेत्यादिशास्त्रंतावत्तत्रयथाऽऽगतंसुस्थं॥तर्पणप्रकारंचाहोशना॥हो
स्त्रोपुग्मतःकृत्वाप्रयेदुदकांजलिं॥शोभ्रंगमाचमुद्धृत्यजलमध्येजलंक्षिपेत्॥त्रया

॥२५॥

सः॥यज्ञोपवीतीदेवानांनिवीतीऋषितर्पणे॥प्राचीनावीतीपित्र्येतुस्वेनतीर्थेनभा
नः॥सुमंतुः॥आकाशेनिक्षिपेद्वारिजलस्योदक्षिणामुखः॥पितॄणांस्नानमाकां
शंदक्षिणादिक्कनथेवच॥त्रीस्त्रीजलांजलीन्दद्याद्देवेभ्यश्चनरंबुधः॥काण्वोजनिः
देवतानांचपितॄणं जलेदद्याज्जलांजलीन्॥असंस्कृतप्रमीतानांस्थलेदद्याज्ज
लांजलीन्॥बौधायनः॥जलांजलित्रयंदद्याद्येचान्येसंस्कृतासुवि॥असंस्कृतप्रमी
तानामेकमेवतदुत्क्षिपेत्॥तत्रमंत्रः॥अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम॥
भूमौदत्तेनतोयेनतृप्तायांतुपरांगतिमिति॥ततोजलाद्बहिर्गमपादेनिधायाचम्य
यक्ष्माणेनर्पयेत्॥तद्विधिमारभगवान्॥स्नानांगतर्पणंकृत्वायक्ष्मणेजलमाद्रे
त्॥तन्मंत्रस्तु॥यन्मयादूषितंतोयंशरीरमलसंभवात्॥तद्दोषपरिहारार्थंयक्ष्माणंतं

यास्यहानतोनरोव्रार्थनोक्तकूर्मपुराणे॥स्नानतोस्नानतोवापियन्मेङ्गस्थरितंकृतं॥
तत्क्षमस्वाखिलंदेविजगन्मातर्नमोस्तुते॥अथस्नानदर्भविशेषानाह॥तथाचस्मृ
तिः॥विकिरेपिंडदानेचतर्पणेस्नानकर्मणि॥आचांतःसव्यकुर्वीतदर्भसंत्यजनं
बुधइति॥विष्णुः॥स्नातःशिरोनावधुनेन्नांगेभ्योयमुद्धरेत्॥नचश्वर्धृतंवासोनच
तैलमुपस्पृशेत्॥स्नात्वानधावयेद्वस्त्रंनमृत्याद्यासमासुरवा॥मार्कंडेयपुराणे॥अव
मृज्यान्नचस्नातोगात्राण्यंबरपाणिभिः॥नचनिर्धुनयात्केशान्नासश्चैवनिर्धुनेदि
ति॥परिधेयवस्त्रविशेषमाह॥देवलः॥स्वयंधौतेनकर्तव्याक्रियाधर्म्याविपश्चिता
॥ननुनेजकधौतेननाहतेननकुत्रचिदिति॥नेजकोरजकः॥नाहतेनेतिसमस्तंप
दं॥अहतलक्षणंचशाणेनोक्तं॥यतिब्रह्मचारिवानप्रस्थानामहतः॥ब्राह्मणस्यसितंवस्त्रं

स्य

नृपतेरक्तमुत्तमं॥पीतंवैश्यशूद्रस्यनीलंमलवदिष्यते॥विकल्पोवनरीयश्च न
यश्चावस्त्रएवच॥श्रौतंस्मार्तंतथाकर्मननग्नश्चितयेद्यपि॥नग्नःस्यान्मलवद्वासा
नग्नःकौशेयकेवलः॥नग्नोहिगुणवस्त्रःस्यान्नग्नोरंभपटस्तथा॥नग्नश्चस्यूतव
स्त्रःस्यान्नग्नोग्रथितवस्त्रकः॥नग्नश्चबहुवस्त्रःस्यान्नग्नःकौपीनकेवलः॥कक्षोपव
स्त्रःसाक्षाच्चदशनग्नाःप्रकीर्तिताः॥परिधानप्रकारमाहजातूकर्ण्यः॥परिधानाद्व
हिःकक्षानिवद्यास्यासुरीमतां॥धर्मकर्मणिविद्वद्भिर्वर्जनीयाप्रयत्नतः॥आर्द्रव
स्त्रोनारुणेविशेषःस्मर्यते॥स्नानंरुत्वार्द्रवस्त्रंतुऊर्ध्वमुत्सारयेद्द्विजः॥आर्द्रवस्त्रमु
पस्पृश्यस्नात्वेतुनःस्नानेनशुध्यति॥जाबालिः॥निष्पीड्यनेधौतवस्त्रंयदास्कंदेद्विनिक्षिपे
त्तानदासुरंभवेत्कर्मपुनःस्नानविशोधनं॥वस्त्रंचतुर्गुणीकृत्यनिष्पीड्यसदशंनथा॥

वामपक्षोद्धृत्य निक्षिप्य स्थलस्थद्विराचमेत्॥वस्त्रविगणितंयस्कृतं निष्पीड्यतिमंद
धीः॥इथास्नानंभवेत्तस्यस्नानस्यादशमंबुनि॥विष्णुपुराणे॥होमदेवार्चनाद्यासु
क्रियासुपरदेनथा॥नैकवस्त्रःपरेतद्विजोनाचमनेजपे॥गोभिरुः॥एकवस्त्रो
नभुंजीतनकुर्यादेवतार्चनं॥शातातपः॥सव्यादंसात्परिभ्रंसेनाभिदेशेव्यवस्थि
तं॥एकवस्त्रंतुविद्यादैदेवेपित्र्येचकर्मणि॥एतन्नोनरीयंजीवत्पितृकैर्नधार्यमि
तिस्मर्यतेपारिजातेऽनरीयंयोगपरंतर्जन्यांरजतंतथा॥नजीवत्पितृकैर्धा
र्यज्येष्ठोवाविधत्तेयदि॥अनुकल्पमाहयोगयाज्ञवल्क्यः॥अलाभेधौतवस्त्रस्यशा
णक्षौमाविकानिचाकृतंपयोगपरंचविद्यात्सकृन्नवेभवेत्॥स्मृत्यंतरेयज्ञोपवी
तेद्वेधार्येश्वेतेस्यातांचकर्मणि॥तृतीयमुत्तरीयार्थंवस्त्राभावेतदिष्यते॥पारस्क॰

॥१७॥

स्नाहा॥एकंचेद्वासोभवतिनस्त्रियोनरवर्गश्चेणेडादयीत॥यमुजाबालिः॥स्नात्वानिर्व
स्यवस्त्रंचजंघेशोध्येमृदंभसा॥अपविद्धंकृतंनेतुकोपीनस्यवधारिणी॥तत्र
तिविषयेवृद्धमनुः॥निष्पीड्यस्नानवस्त्रंतुपश्चात्संध्यांसमाचरेत्॥अन्यथाकुरु
तेयस्कस्नानंनस्याफलंभवेत्॥गृह्यपरिशिष्टे॥अथनीरमेत्यदक्षिणामुखः शा
खीनाखीतीयेकेचास्मत्कुलेजाताअप्रजागोत्रिणोमृताः॥तेषांकृतमयादत्तंवस्त्र
निष्पीडनोदकमितिवस्त्रंनिष्पीड्योपवीत्यपउपस्पृश्यपरिधानीयमभ्युक्ष्यपरि
धायान्यद्योत्तरीयमभ्युक्षितंशतृत्यद्विराचामेदितिमनुस्मृतिमनुष्यतर्पणेचैवस्ना
नवस्त्रनिपीडनेनिवीतीचभवेद्विवस्त्रथामृत्पुरीषयोरितिनदेवराध्वलायन
भिन्नविषयेआश्वलायनानांतुशाखीनाखीतिनैववस्त्रनिष्पीडनंगृह्यपरिशिष्टव

+ ?

चन शाबल्यादिनिषारिजाने॥ ॥अथस्नानभेदाः॥ ॥शंखः॥स्नानंतुद्विविधं
प्रोक्तंगौणमुख्यप्रभेदतः॥तयोर्लक्षणमुख्येनतुनःषड्विधंभवेत्॥तेचषट्चक्र
राभाग्नेयपुराणेदर्शिताः॥नित्येनैमित्तिकंकाम्यंक्रियांगमलकर्षणं॥क्रियास्नानं
नथाषष्ठंविद्धिस्नानंचकीर्तितं॥एषांलक्षणमाहशंखः॥अस्नातश्चपुमान्नाहोंज
पाग्निहवनादिषु॥ज्ञानःस्नानंतदर्थंतुनित्यस्नानंचकीर्तितं॥चंडालश्वशवस्पर्शादिस्पृ
ष्टास्नातोरजस्वला॥स्नानार्हस्यादास्नातिस्नानंनैमित्तिकंहितत्॥पुष्पस्नानादि
कंयत्तुदेवज्ञविधिचोदितं॥तद्धिकाम्यंसमुद्दिष्टंनाकामस्यतत्प्रयोजयेत्॥जपुकाम॥२८॥
पवित्राणिअर्घ्यंदेवताःपितृन्॥स्नानंसमाचरेद्यत्तुक्रियांगंतत्प्रकीर्तितं॥मला
पकर्षणंनामस्नानमभ्यंगपूर्वकं॥मलापकर्षणार्थायपुंसांनित्यमथापरं॥स

सुदेवखातेषुतीर्थेषुचनदीषुच॥क्रियास्नानंसमुद्दिष्टंस्नानंनत्रमनाक्रिया॥ज्ञा
णस्यषट्प्रभेदानिरूपिताः॥तत्राश्रमप्रभेदेनव्यवस्थामाहदक्षः॥स्नानंमध्याह्नयो
स्नानंवानपस्थगृहस्थयोः॥यतेस्त्रिषवणंप्रोक्तंसकृत्तुब्रह्मचारिणइतिस्थितिः॥
ब्रह्मक्षत्रविशांचैवमंत्रवत्स्नानमिष्यते॥तच्छूद्रस्यस्त्रीणांचकुरुनंद
नेति॥व्यासः॥मंत्रप्रतंजलेस्नानंयाहुस्नानफलप्रदं॥नरेथाग्निमग्नोयाद
सामिवनत्फलं॥कात्यायनः॥अस्नातोहोमकालस्यबहुत्वात्स्नानकर्मणः॥ज्ञानः
संक्षेपतःस्नानंहोमलोपेविगर्हितइति॥संक्षेपस्नानप्रकारश्चयोगयाज्ञवल्क्या
द्गुरुः प्रागेवाभिहितोनुक्तस्यतयाप्युक्तस्यसूच्यतेशेषस्यपरिशेषे॥अथस्नान
विधिस्नात्वानर्मध्याह्नेवगृहस्थःकुर्यादेकनरत्नवाज्ञानरेवब्रह्मचारीयतिस्त्रिषु

वा

सवनेषुद्विस्त्रिर्वानवस्तुत्रयातःसहगोमयेनकुर्यान्मध्यंदिनेसायंभुद्वा
भिरद्भिर्नयातःस्नानात्वाकसंध्यामुपासीतयातरुत्सृष्टंगोमयंतंनरिक्षस्थं
संगृह्यभूमिंगोपर्यधश्चसंत्यज्यतीर्थमेत्यधौतपाणिपादमुखआचम्यसंध्यं
कृवदात्माभ्युक्षणादिकृत्वाद्विराचम्यसंयतपाणःकर्मसंकल्प्यगोमयंवीक्षि
तमादायसव्यपाणौकृत्वाव्याहृतिभिस्त्रिधाविभज्यदक्षिणभागंव्रणवेनदि
क्षुविक्षिप्योत्तरंतीर्थंक्षित्वामध्यस्थंमानस्तोकइत्यृचाभिमंत्र्यगंधद्वारामि ॥२७॥
त्यृचामूर्धादिसर्वांगमालिप्यप्राञ्जलिः॥हिरण्यशृंगंवरुणंप्रपद्येतीर्थमेदेहि
यानिनः॥यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः॥यन्मेमनसावाचाकर्मणा
वाइदंकृतंरुतोनेनरंद्रोवरुणोहरस्मतिःसविताचेपुनःपुनः॥इतिद्वाभ्यांअवनेहे

पुनंतु

ऊइतिद्वाभ्यांप्रसाजेहृदयेतिसूक्तेनशार्ष्ण्याःप्रवतोनिवतउद्वत
उदन्वतीरित्येतयातीर्थमभिमृश्यावगाह्यस्नातोद्विराचम्यमार्जयेदंवरुणस्यत्वा
मित्रियऽभिराप्योद्विडेतिचतसृभिरथतीर्थंसृष्टेनेमंमेगंगेइत्यृचाभिः
प्रदक्षिणमालोड्यप्रकाशेऽष्टमयीघमर्षणसूक्तंत्रिरावृत्यानिमज्योन्मज्य
दित्यवमवलोक्यद्वादशकृत्व आचम्यपाणिभ्यांशंखमुद्धृत्योदकमादाय
मूर्ध्निभ्रुवोर्मुखेबाह्वोरुरसिचात्मानंगायत्र्याभिषिंचेन्नोअग्नेवरुणस्यविद्वा लंब
नितिद्वाभ्यांनरस्तमंदीधावतीतिसूक्तेनपुनःस्नायान्मूर्ध्निचाभिषिंचेन्नहिस्रो:
परमंपदमग्नेरक्षाणोअंहसोयत्किंचेदंवरुणदैव्येजनेइत्येतानजपेत्स्नातो
भिमुखःसरित्सुस्नायादन्यत्रादित्याभिमुखोथसाक्षताभिरद्भिःपश्चिमखउपवीतीद

आ. क
॥२०॥

वतीर्थेनऋाहृतिभिर्ब्रह्मादीन्देवान्सरुत्सरुन्तर्पयित्वाथोदङ्मुखोनि
वीतीसव्याभिरद्भिःप्राजापत्येनतीर्थेनऋषीन्नाभिर्ऋाहृतिभिर्हिरण्यपिते
यदक्षिणामुखःपाचीनावीतीपितृतीर्थेनसतिलाभिरद्भिःर्व्याहृतिभिरेवसोमः
पितृमान्यमोंगिरस्वानग्निष्वात्ताःकव्यवाहनइत्यादीस्विस्विस्तर्पयेदेतत्स्नानं
गतर्पणमिति॥अथतीरमेत्येत्यादिहिरण्यमेदित्यंतएतद्देवःपायुदाहृतः॥शौ
नकस्क॥पसव्याजेइहन्तूक्तमष्टंचवारुणंजपेत्॥समुद्राइर्मिरित्यांसूक्तमेको
दशर्कं॥आपोअस्मान्मातेरइत्यृचंचजपेन्नरः॥अवगाह्यनिमज्याथहिरा
॥२०॥
ण्यमित्येत्याभिषेचयेत्॥अंबयोयंत्रोषधीचआपोहिष्ठादयोनवा॥अद्भिःस्नात्वोदकेम
ग्नस्त्रिःपठेदघमर्षणं॥कुर्याद्दादशभिःस्नानंनामभिःकेशवादिभिः॥अनेनविधिनास्ना

नंसर्वपापप्रणाशनं॥धन्यंयशस्यमायुष्यंआरोग्यंपुष्टिवर्धनमिति॥ ॥इतिनि
त्यस्नानं॥ ॥अथनैमित्तिकस्नानं॥ ॥मनुः॥दिवाकीर्त्यमुदकंचपतितं
सूतिकांतथा॥शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुध्यतीति॥दिवाकीर्त्यश्चंडालः॥
चंडालादिस्पृष्टिनमारभ्यतृतीयस्यसचैलस्नानं॥चतुर्थस्यत्वाचमनमात्रेणशु
द्धिः॥तथाचमरीचिः॥उपस्पृशेच्चतुर्थस्तुनरर्ध्वशोक्षणंस्मृतमिति॥यतुसंवर्तो
नद्योरेवस्नानमुक्तं॥तत्स्पृष्टिनंस्पृश्यस्नानंतस्यविधीयते॥ऊर्ध्वमाचम
नंशोक्तंद्याणांशोक्षणंनथेति॥तदबुद्धिपूर्वस्पर्शविषयमिति माधवः॥तथा
तु चसंयमः॥अबुद्धिपूर्वस्पृष्टेदोषःस्नानंविधीयतेरतिः॥यतुकूर्मपुराणे॥चंडालस्त
नक्रिशवैःसंस्पृष्टंसंस्पृश्यदि॥पमादात्तदाचम्यजपंकुर्यात्समाहितः॥तत्स्पृष्टिस्पृ

ष्टिनेस्पृष्ट्वाचदिपूर्वंद्विजोत्तमः॥आचामेत्तुविशुध्यर्थंयाहदेवःपितामहइति॥तद्
ङ्गायेनरितस्यस्पर्शविषयो॥स्नातस्पर्शेतुविशेषमाहयत्रचेनाः॥स्नातरितसं
स्पर्शःसाक्षात्स्पर्शोभिधीयते॥साक्षात्स्पर्शेतुयत्नोक्तंनदस्नातरितेपिचेति॥स्ना
नस्यनिमित्तान्तरमाहमूलं॥विनिंचविनिकाष्ठंचयूपंचंडालमेवच॥स्पृष्ट्वादेवल
कंचैवसचैलोजलमाविशेत्॥शिष्ट्वाशपतानेनान्लोकायतिकंकापिलान्॥
विकर्मस्थान्द्विजान्स्पृष्ट्वासचैलोजलमाविशेत्॥कापिलंकौलसंस्पृश्यचाणा
यामोधिकोमतइति॥देवलकलक्षणंस्मर्यतेदेवार्चनपरोविप्रोविनाथैरव ॥२१॥
सरत्रयी॥सवैदेवलकोनामहव्यकव्येष्वगर्हितइतिस्मृतिरत्नावल्यां॥शिवंस्म
र्यतथाचंद्रउर्गादीरुग्रदेवताः॥योर्चयेत्पणश्चंतुसद्यःपतितोनरः॥देवलक

स्पर्शेदेवस्नानादन्यत्र॥यूपस्पर्शस्यपशुबंधादन्यत्रनकर्तव्यइतिविशेषोबोध्यः॥
नदुष्टसंयोगेनस्नायादेवलयूपंदेवस्नानेचबंधने॥अन्यदातुभोस्स्पृ
सचैलोजलमाविशेदिति॥लोकायतिकंकापिलानितिकर्मधारयः॥गोबली
वर्दन्यायमाश्रित्यद्वंद्वोवा॥उभयथापिलोकेकदेशिनएवकापिलाइहगृह्यते
ननुसाख्याः॥स्पृष्टेचेदंथाइकोडुहेमाद्रियंथेनग्नादिनिरूपणंघटकोनि
मित्तिकस्नानंचरात्रावपिकर्तव्यं॥तदाहव्यासः॥महानिशातुविज्ञेयामध्ययाम
द्वयंनिशि॥तस्यांस्नानंनकुर्वीतकाम्यंनैमित्तिकंचरेत्॥रात्रिस्नानेविशेषमा
हात्रिः॥रात्रौस्नानंयदिभवेत्सध्यानग्निंसमाचरेत्॥स्वर्णागुलिकरोविप्रोवह्निना
गविनाचरेत्॥इदंचमध्ययामद्वयंयाज्ञव्यासः॥शेषेपश्चिमेयामेदिनवत्

स्नानमाचरेदिति॥पराशरः॥अस्पृश्यस्पर्शनेजातेअश्रुपातेक्षुरेभगे॥स्नानंनैमित्तिकं
कार्यदैवपैत्रविवर्जितमिति॥दैवकर्षितर्णरहितमित्यर्थः॥तथाचसएवा॥न
ष्टौमेवागृहेनयदास्यादशुचिर्नरः॥आचम्यप्रयतःपश्चात्स्नानंविधिवदाचरेत्॥
अत्रोच्छोदकंनिषेधतिबृहन्मनुः॥मृतेजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा॥अस्पृ
श्यस्पर्शनेचैवनस्नायादुच्छवारिणा॥गार्ग्यः॥कुर्यान्नैमित्तिकंस्नानंशीताद्भिःका
म्यमेवच॥नित्यादृष्टिकंचैवयथारुचिसमाचरेदिति॥अथकाम्यस्नानं॥पु॰
स्यः॥पुष्येचजन्मनक्षत्रेव्यतीपातेचवैधृतौ॥अमावास्यांनदीस्नानंपुनात्यासप्त
मंकुलं॥चैत्रेकृष्णचतुर्दश्यांयःस्नायाद्बिल्वसंनिधौ॥नपश्येत्तस्यमार्गेतिगंगायांच
विशेषतः॥शिवलिंगसमीपेतुमुच्यतेसर्वकिल्बिषैः॥ज्येष्ठेमासिसितेपक्षेदशम्यां ह

॥२२॥

स्तसंयुतेहरजन्माघहागंगानेनपापहरास्मृतेति॥विष्णुः॥सूर्यग्रहणतुल्यंतुभुक्ता
नंतस्यसप्तमी॥अरुणोदयवेलायांनस्नानंमहाफलं॥पुनर्वसुबुधोपेताचैत्रमा स
सितासप्तमी॥स्नानःसुविधिवत्स्नात्वाजपेयफलंलभेत्॥आदित्यपुराणे॥कार्तिकंसक
लंमासंनित्यस्नायीजितेंद्रियः॥जपन्हविष्यभुक्स्नानःसर्वपापैःप्रमुच्यते॥तुलामक
रमेषुस्नानःस्नायीसरोभवेत्॥हविष्यब्रह्मचर्यंचमहापातकनाशनमिति॥मत्स्य
पुराणे॥आषाढादिचतुर्मासंस्नानःस्नायीभवेन्नरः॥विप्रेभ्योभोजनंदत्वाकार्तिको
गोप्रदोभवेत्॥सर्वेष्वेवंपरंस्नानमितिविष्णुव्रतमितिस्मृतमिति॥माकंडेयः॥सर्वकाल
मितैःस्नानंवृण्व्यासोब्रवीन्मुनिः॥तृप्त्यामलकैर्विल्वैरेकादश्यांविशेषतः॥श्रीका
मःसर्वदास्नानंकुर्वीतामलकैर्नरः॥सप्तमीनवमीचैवपर्वकालंचवर्जयेदिति॥वि

ष्ठुः॥बालाश्चनरुणाश्चद्धानरनारीनपुंसकाः॥स्नात्वानाघेशुभेतीर्थेशाश्वतंफ
लं॥माघेमासिवसित्वात्वाविशुद्धोऽकंसगच्छति॥चंद्रिकायां॥दर्शेचपौर्णमासंवाश्रा
श्यस्नानमाचरेत्॥पुण्याम्रहानिर्विशतुमकरस्थेदिवाकरे॥अशक्तनशरीरस्थैःकृ
तंस्नानमाचरेत्॥पदेपदेश्वमेधस्यफलंशतगुणोत्तमं॥अनभ्यंगीद्विजोमांसंसर्व
वर्जयेद्दृढं॥ततःस्नानस्यचस्नानेभोज्यंहव्यंसुसंस्कृतं॥भोजयेद्विजदंपत्यंभूषयेच्च
सुभूषणैः॥दंपत्योर्वाससीसूक्ष्मेसप्रधान्यसमन्विते॥विशच्चमोदकान्देयाःशर्करा
तिलसंयुताः॥अथाश्वत्थछायाजलस्नानं॥आदित्यपुराणेगुरोर्वरिष्यतावास्या
श्वत्थछायावारिणा॥स्नानंवापागस्नानेनसमंपापनाशनं॥पारिजाते॥अश्वत्थो
दकेस्नायाद्गजच्छायेतिसोच्यते॥अमागुरुसमायोगःसूर्यपर्वशतादिक॥इति॥

॥२३॥

तर्पये२

तत्रशार्थनामंत्रः॥ओंवोहस्पतिःसोरिराचार्योगुरुरंगिराः॥वाचस्पतिर्दैवमंत्रीश्रु
भंकुर्यात्सदामम॥एतैर्नामभिरद्भिःशार्थयैंतथा॥ ॥इत्यश्वत्थछायास्नानं॥
अथसमुद्रस्नानं॥ ॥तत्राचार्यः॥समुद्रेपर्वसुस्नायादमायांतुविशेषतः॥पापेवि
मुच्यतेसर्वैरमांतेस्नानमाचरेत्॥श्रीभोमदिनेस्नानंसमुद्रेचविसर्जयेत्॥ग्रहणे
रविवारेचसूत्रेणैतदाचरेत्॥सेतौतुतन्माहात्म्येनकालनियमःसेतौसमुद्रस्ना
नकर्मणि॥सदासर्वाघहासेतुर्ग्रहणादिषुकिंपुनरिति॥ ॥इतिकाम्यस्नानप्रपंचः॥
किंवागस्नानंतु॥शानःशुक्लतिलैस्नात्वामध्याह्नेदेवनार्चयेदित्यादिद्रष्टव्यं॥अथमला
पकर्षस्नानं॥गर्गः॥पंचरश्मेचतुर्रश्मेसप्तरश्मेरविंक्रमे॥द्वादशरश्मेसप्तमीषष्ठीलो
मशंविवर्जयेत्॥नचकुर्यान्नवापांवयोरश्मितथोनथा॥

नवम्यांचदशम्यांचक्षेमभिच्छन्हिपंडितइति॥मनुः॥पक्षान्तेचरवेश्चव्यादीक्षायांचतथातिथौ॥नैलेनाभ्यज्यमानस्यनाभ्यर्थोविद्यतेक्वचित्॥माधवीयेज्योतिर्ग्रंथेचतत्रैवसंनाप्यःकोनिरत्यायुर्धनंनिर्धनतातथा॥अनारोग्यंसर्वकामाअभ्यंगाद्भास्करादिषुप्रचेताः॥सार्षपंगंधतैलंचयत्नेनैवंविवर्जयेत्॥अन्यद्रव्यमुनंतैलेनद्रव्यंनिष्फलंचनेति॥इतिमलापकर्षस्नानं॥अथक्रियास्नानं॥तीर्थाभावेतुकर्तव्यमुष्णोदकैः॥तत्रनिषेधतिथाज्ञवल्क्यः॥नथानद्युष्णोदकस्नानंनथाजन्यमवैदिकं॥नथात्रश्राद्धियेदानंनथासूक्तमसाक्षिकमितिस्मृतिः॥नित्यंनैमित्तिकंचैवक्रियांगंमलकर्षणं॥तीर्थाभावेतुकर्तव्यमुष्णोदकपरोदकैः॥आदित्यकिरणैःपूतंपुनःपूतंचवह्निना॥आस्नानमानुरस्नानेप्रशस्तंनरदांगिनामितिहेमाद्रिधृतेवसूक्तेः॥आपःस्वभावतोमेध्याःकिंपुनर्वह्निनापिताः॥अतःसंतःप्रशंसंतिस्नानमुष्णेनवारिणेति॥हेमनुः॥संक्रांत्यांभानुवारेचसप्तम्यांरविदर्शने आरोग्यंचाभिलाषार्थीस्नायादुष्णवारिणेति॥इतिवारुणस्नानप्रपंचः॥ ॥अथगौणस्नानानि॥ ॥हेमनुः॥असामर्थ्यात्शरीरस्यकालशक्त्याद्यपेक्षया॥मंत्रस्नानादिकंप्रोक्तंमुनिभिःशौनकादिभिरिति॥पारिजाते॥आपोहिष्टादिभिर्मंत्रैर्मृदालंभस्मपार्थिवं॥आग्नेयंभस्मनास्नानंवायव्यंगोरजःस्मृतं॥यत्तुस्नानंप्रवर्षेणस्नानंतद्दिव्यमुच्यते॥अवगाहोवारुणंस्यान्मानसंविष्णुचिंतनं॥मूलं॥आग्नेयंभस्मनास्नानमवगाह्यचवारुणं॥आपोहिष्ठेतिचाब्दैवायव्यंरजसागवां॥यत्तुस्नानंप्रवर्षेहिनस्नानंदिव्यमुच्यते॥स्नानान्येतानिचापस्तु

॥२४॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

व्याधितस्योदकंविनेति॥अथकापिलस्नानं॥अशक्तावशिरस्केयत्स्नानंमंत्रविधानतः॥
आर्द्रेणवाससासर्वांगमार्जनंकापिलंस्मृतं॥अथसारस्वतं॥विद्वत्सारस्वतीप्राप्तंस्नानं
सारस्वतंविदुः॥अथगायत्रं॥गायत्र्याजलमादायदशकृत्वोभिमंत्र्यच॥शिरस्त्र्यंगा
निसर्वाणिशेक्षयेन्नवारिणा॥स्नानंगायत्रकंनामसर्वपापप्रणाशनं॥अशक्ता
नांतुजंतूनांगुरोःपादोदकंशुभं॥तथा॥विष्णोःपादादिक्षुपादानुलस्याःसंभृतंजलं॥
शेक्षणात्स्नानमात्रेतिध्यानस्नानंविशिष्यते॥चतुर्भुजंमहाकायंशंखचक्रगदाधरं॥
ध्यायीतमनसाविष्णुंस्नानंमानसमुच्यते॥एवमुक्तेषुकल्पेषुस्नातोजपादिषट्॥ ॥२५॥
नतुदेवार्चनाविष्णोर्दाहाचार्यः॥स्नातःस्नातुमशक्तस्यरोगाद्यैर्वाभयाच्चवा॥
सर्वंवस्त्रंपरित्यज्यगौणस्नानेनशुद्ध्यति॥सचकर्मसनर्हस्याद्विष्णुदेवार्चनादिषु॥

जपेत्संध्यांतथावेदान्सोधीयीतयथाविधीति॥ ॥इतिस्नानप्रकरणं॥ ॥अथतिल
कविधिः॥ ॥ब्रह्मपुराणे॥पर्वतायेनदीनीरेसमक्षेत्रेविशेषतः॥सिंधुनीरेच
वल्मीकेतुलसीमूलआश्रिताः॥मृदएतास्तुसंपाद्यवर्जयेदन्यमृत्तिकां॥द्वार
वत्युद्भवागोपीचंदनाद्ध्वपुंड्रकं॥कारयेन्नित्यमेवंहिपापंहंतिदिनेदिने॥जाह्न
वीनीरसंभूतांमृदंमूर्ध्नीबिभर्तियः॥बिभर्तिरूपंसोर्कस्यनमोनारायणेबले॥स्या
मंशांतिकरंशोकंरक्तंवश्यकरंभवेत्॥श्वेतंकरंपीतमित्याहुर्वेष्णवंश्वेतमुच्यते॥
अंगुष्ठःपुष्टिदःशोक्तोमध्यमायुष्करोभवेत्॥अनामिकांतुसानित्यंमुक्तिदाचप्रदे
शिनी॥एतैरंगुलिभेदैस्तुकारयेन्नतुनखैस्तथा॥चंद्रिकायांबृहद्गौतमीये॥ललाटे
केशवंविद्यान्नारायणमथोदरे॥माधवंहृदिविन्यस्यगोविंदंकंठकूपके॥उदरे

दक्षिणे पार्श्वे विष्णुरित्यभिधीयते॥तत्पार्श्वे बाहुमध्ये तु विन्यसेन्मधुसूदनं॥विविक्त
मं कर्णदेशे वामकुक्षौ तु वामनं॥श्रीधरं बाहुकेवामे हृषीकेशं तु कर्णके॥पृष्ठदेशे
पद्मनाभं कुक्षौ दामोदरं स्मरेत्॥हृदादशेनानिनामानिवासुदेवेनि मूर्धनि॥संकर्षणा
दिभिः षड्भिः षड्भिस्तु केशवादिभिरिति॥शौनकः॥ऊर्ध्वपुंड्रं शिवस्थैव कुर्याद्विष्णोश्च
बाहुथः॥मूर्ध्निमूलेनमंत्रेण शेषं द्वादशनामभिः॥स्नानेषड्विधः स्नात्वानमोनैः
प्रणवेन चेति॥स्नानविशेषेणाह निविशेषः स्मर्यते॥निदिलेबाहवोश्चैव दंडवत्क
र्णपल्लवे॥हृदयेकमलाकारमुदरेदीपवल्लिवत्॥वेणुपत्रसमाकारंवाक्षोर्मध्ये ॥२६॥
लिखेत्सुधीः॥अथः पृष्ठेस्कंधदेशेलिखेज्जंघाकृति॥भालेरंगुलप्रमाणं
तनुत्तमोत्तममुच्यते॥नवांगुलंमध्यमंस्यादंगुलमतः परं॥सप्तषट्पंचभिः पुंड्रं

मध्यमंत्रिविधंस्मृतं॥चतुस्त्रिद्व्यंगुलैः पुंड्रंकनिष्ठंत्रिविधंभवेत्॥ऊर्ध्वपुंड्रमृजुं सो
म्यंकनिष्ठांगुलिवत्स्मृतं॥नासादिकेशपर्यंतंत्रयंत्वाद्वारयेद्विजः॥तारिजातेसं
यहः॥ऊर्ध्वपुंड्रंत्रिपुंड्रंवामध्येभूत्यंधारयेत्॥श्रीपुष्पमुखतन्मध्येउमयाह
श्रियाहरिरिति॥स्मृतिसारसमुच्चये॥गोपीचंदनलिप्तांगोयंयंपश्यतिचक्षुषा॥
तेतंभुंड्रंविजानीयात्नात्रकार्यविचारणेति॥अभुक्तिर्मोक्षनाशोमनसापापमा
चरन्॥भुक्तिरेवभवेन्नित्य मूर्ध्वपुंड्रंकिलोनरइति॥सत्यव्रतः॥मंडलीधारयेन्नि
त्यंऊर्ध्वपुंड्रंविनातुतत्॥यत्कर्मकारयेन्नित्यंतत्सर्वंनिष्फलंभवेत्॥इतिशंख
वचनं॥शंखचक्रांकितंकंठंतुलसीरुद्रभूषणं॥यःकुर्यान्नियतंभक्त्यासयातिप
रमांगतिं॥नान्यदेवंनमस्कुर्यान्नान्यदेवंनिरीक्षयेत्॥वैष्णवैःकिंतःसदानिष्ठेमद्भक्तः

पांडुनंदनेति॥तद्दिक्मार्गपरिभ्रष्टविषयं॥तथाचाश्वलायनः॥शिवकेशवयो
श्चिद्भस्म कश्यपादिकान्द्विजः॥नधारयेन्मनिमान्वेदिकेवर्त्मनिस्थितइति॥
ब्रह्मांडे॥मृत्तिकावेदनेचैवभस्मतोयंचतुर्थकं॥एभिर्द्रव्यैर्यथाकालमूर्ध्वपुंड्रं
भवेत्सदा॥स्नात्वापुंड्रंमृदाकुर्याद्धुत्वाचैवतुभस्मना॥दिवताभ्यर्च्यगंधेनसर्व
पापप्रणश्यति॥जलेनतिलकंकुर्याज्जलातःकर्मसिद्धयइति॥संग्रहे॥नकुर्याद्विन्म
ध्यातिर्यक्कन्यसेदूर्ध्वंनभस्मनेति॥अत्रभस्मनोर्ध्वपुंड्रस्यविहितत्वाद्ध
स्तेनभस्मोद्धृत्यवस्तेतिपरिज्ञातेकात्यायनः॥थादेयज्ञेनयेहोमेवैश्वदेवेसुराचै
नाधृतत्रिपुंड्रःप्रनात्मासृष्टुंजयतिमानवः॥विष्णुपुराणे॥मितेनभस्मनाकुर्या
त्रिसंध्यांचत्रिपुंड्रकं॥सर्वपापविनिर्मुक्तःशिवेनसहमोदते॥अकरणेप्रत्यवायउ

॥२७॥

क्तस्त्रैवर्णिकस्यशोचंजपोहोमस्तीर्थदेवादिपूजनं॥तस्यव्यर्थमितरंसर्वंयस्त्रिपुंड्रं
नधारयेन्नरइतिस्मृतिरत्नावल्यां॥ललाटेद्वादशेनाभौगलांसेषोडशेषु॥एषदे
शेशिरस्येवंस्थानेष्वेतेषुधारयेन्नाष्टौस्थानानि॥अग्निरित्यादिमंत्रैःभुजद्वयलाभि
मंत्रितं॥शिवमंत्रेणनद्यायंमंत्रेणाक्षरेणवा॥गायत्र्यावादेवदेवेमंत्रेणवण
वेनवा॥करोतिशिवमंत्रेणयस्त्रिपुंड्रंद्विजोत्तमः॥त्र्यक्षःशूलधरःसौम्यशिवलो
केमहीयते॥अक्षरेणमंत्रेणयःकरोतित्रिपुंड्रकं॥विष्णोःपरमकाप्तोतिनान्य
थाऋतिरोदितं॥सोरंपरमवाप्नोतिगायत्र्यामुनिसत्तम॥प्राप्नोतिब्रह्मणोरूपं
प्रणवेननसंशयइति॥अग्निरित्यादिमंत्रास्याथर्वशिरसायोपदर्शिताः॥भस्मात्रि
मंत्रणमंत्रस्यविष्णुऋषिः॥गायत्रीछंदः॥रुद्रोदेवताभस्मशुध्यर्थेजपेविनि

योग:॥अग्निरितिभस्मा॥जलमितिभस्मा॥स्थलमितिभस्मा॥व्योमेतिभस्मा॥सर्वहवाइदंभ
स्मा॥मनएतानिचक्षूंषिभस्मानीतिरत्नावल्यो॥मध्यमानामिकांगुष्ठै रनुलोमविलो
मतः॥अतिस्वल्पमनोगुप्यंअतिदीर्घंनपःक्षयं॥नेत्रयुग्मप्रमाणेनत्रिपुंड्रंधारये
द्विजः॥सारिजातोधार्यंभस्मत्रिसंध्यंनुग्रहीणाजलसंयुतं॥सर्वकालेभवेत्स्त्रीणां
यतीनांजलवर्जितं॥वानप्रस्थस्यकन्यानांदीक्षाहीननृणांतथा॥मध्याह्नात्प्राक्तुजं
लैर्युक्तंपरंतोजलवर्जितं॥मध्यासन्नित्रयेणैवस्वदक्षिणकरस्यच॥त्रिपुंड्रंधा
रयेद्विद्वान्सर्वकल्मषनाशनमितिं॥तत्रैवा॥षडंगुलप्रमाणेनज्ञास्यणांत्रिपुंड्र
कं॥नृणांचतुरंगुल्यंवैश्यानांह्यंगुलेनथा॥शूद्राणामथसर्वेषामेकांगुल्यंत्रिपुं
ड्रकमिति॥तत्रैवा॥त्रिपुंड्रंज्ञास्यणोविद्वान्मनसापिनलंघयेत्॥अत्रविधीयतेय ॥२८॥

स्मानत्यागीपतितोभवेत्॥त्रिपुंड्रेणविनायेनविप्रेणपरमुच्यते॥ननत्र्यंननत्र
ह्यनंननद्यनंजपोनसः॥संयद्दोषंभस्मधारिणंदृष्ट्वागच्छंतिमानवाः॥तेषां
भूदेवसंभूतिरनुमेयाद्विपश्चितः॥नारदः॥मद्यपीत्वागुरुदारांश्चगत्वास्व
र्णस्तेयंब्रह्महत्यांचकृत्वा॥भस्मालोभस्मशय्यासनस्थस्त्रिध्यायन्मुच्यतेपा
तकेभ्यइति॥सूतसंहितादिषुत्रिपुंड्रंरुद्रभस्ममहिमेत्यलंबहुना॥ ॥
इतित्रिपुंड्रकरणं॥ ॥अथसंध्याप्रकरणं॥ ॥तत्रसंध्याशब्दोयद्यपिकाल
वचनस्तथापिदर्शपूर्णमासादिवत्कालयोगंनिमित्तीकृत्यकर्मणिवर्तते॥
तत्कालोपास्यदेवतायांचेतिमाधवः॥सात्रैकस्मिन्दिवसेत्रिवारमुपास्या॥यथाह
त्रिः॥संध्यात्रयंतुकर्तव्यंद्विजेनात्मविदामरैति॥कालभेदेनदेवतायानामभेदमाह

व्यास:॥गायत्री नाम पूर्वाह्णे सावित्री मध्यमेदिने॥सरस्वती वसायाह्ने सैव संध्या त्रिषु
स्मृतेति॥अत्र संध्या शब्दआदित्यशब्दवाच्यदेवतापर:॥संधिकालोपास्यत्वादिति
माधव:॥सम्यक्ध्येयत्वात्संध्याध्यैचिंतायामितिधातोरातश्चोपसर्गस्येति कर्म
ण्यङ्॰प्रत्यय:॥इतिपारिजातकार:॥उभयथापिसूर्योध्येयइतिवाक्यार्थ:॥वर्णवि
शेष:स्मृत्यंतरेदर्शित:॥गायत्रीतुभवेद्रक्तासावित्रीशुक्लवर्णिका॥सरस्वतीकृ
ष्णरूपात्वपास्यावर्णभेदतइति॥तथा॥गायत्रीब्रह्मरूपातुसावित्रीरुद्ररूपिणी॥
सरस्वतीविष्णुरूपाउपास्यावर्णभेदतइति॥उपास्येतिध्येयेत्यर्थ:॥तथाचनेत्रि ॥२६॥
रीयब्राह्मणो॥उद्यंतमस्तंयंतमादित्यमभिध्यायन्कुर्वन्ब्राह्मणोविद्वान्सकलंभ
द्रमश्नुतेसागादित्योब्रह्मेतिब्रह्मैवसन्ब्रह्माप्येतियएवंवेदेति॥अस्यार्थ:॥वस्यमा

णप्रकारेणप्राणायामादिकंकर्मकुर्वन्यथोक्तगायत्रीवर्णरूपेणसंध्याशब्द
वाच्यमादित्यंब्रह्मेतिध्यायन्नैहिकमामुष्मिकंचसकलंभद्रमश्नुतेयएवमु
क्तध्यानेनशुद्धांत:करणोब्रह्मसाक्षात्करुतेसपूर्वमपिब्रह्मैवसन्नज्ञानाज्ज्ञी
वत्वेपात्मोपाधौक्षानेनाज्ञानापगमेब्रह्मैव
पाप्नोतीति॥व्यासोपाह्यानभिन्नोप्रतिपद्येतगायत्रीब्रह्मणासहा॥सोहमस्मीत्य
पासीतविधिनायेनकेनचिदिति॥नन्वेवंसतिप्रतियोग्नोपासनुपातकादुप
पातकात्॥गायत्रीशोच्यतेयस्माद्गायंतंत्रायतेततः॥सविनद्योतनात्तेवसावि
त्रीपरिकीर्तिताजगतःप्रसवित्रीगायंतंत्रायतेसरस्वतीतिव्यासोक्तिर्वचनात्ति
मंत्रपरतयापतीयमानानि विरुध्येरंनितिचेन्नाप्रतिपाद्यप्रतिपादकयोरभे

आ॰क
॥३॥

सोपचारेणनदुष्पन्नेरितिपरिज्ञानकारः॥ध्यानदेशश्चस्मर्यतेगायत्रीचिंतये
द्यस्कृत्स्नेसमुपस्थितोधर्मोयमविनिर्मुक्तःसयातिपरांगतिमिति॥अत्र
संध्योपासनशब्दवाच्यंसूर्यध्यानंप्रधानंगायत्रीतुतदंगानीतिबोध्यं॥अत
एवयाज्ञवल्क्यादिभिर्यद्योक्तैःसांगानुष्ठानासमर्थैरादित्योपासनमनुष्ठित
मित्याहव्यासः॥तेनथैवमहाराजदर्शितारणसूर्यनि॥संध्यागतंसहस्रांशु मा
दित्यमुपतस्थिरेपुराणांतरेसएवा॥संध्येतिसूर्यंगंब्रह्मसंध्यानादविभागतः॥
ब्रह्मार्थैःसकलैर्भूतैस्तेनैतैःसचिदात्मनः॥तस्यरासोहमस्मीतिसोहमस्मी ॥३॥
तिवामतिः॥भवेदुपासकस्येतिरेवंबहुविधोविधिरिति॥ ॥इतिसंध्यास्वरूप
निरूपणं॥ ॥अथकालः॥ ॥अत्रिस्मृतौ॥संध्याकालःप्रागुदयाद्विप्रस्यद्विमुहू

ते

र्तकः॥क्षत्रियस्यनदर्धस्यानदर्धस्याद्विशोपुन॥तथैवास्मिन्नेतांवैश्यादीनामयं
क्रमइति॥दक्षस्मृतौ॥रात्र्यंतगामनाडीद्वेसंध्याकालोपसूचने॥दर्शनाद्विलेखायास्तदं
तोमुनिभिःस्मृतः॥अर्धार्कमात्रासायंसंध्यामाध्याह्निकीक्षणइति॥धर्मसारसुधा
निधौ॥उत्तमानारकोपेतामध्यमाउत्तमानराः॥अथसासूर्यसहितापातःसंध्यात्रिधा
स्मृता॥उत्तमासूर्यसहितामध्यमाउत्तमानराः॥कनिष्ठानारकोपेतासायंसंध्यात्रि
धामतेति॥ ॥इतिसंध्याकालः॥ ॥अथदेशः॥व्यासः॥गृहेत्वेकगुणासंध्यागोष्ठेद
शगुणास्मृता॥शतसाहस्रिकानद्यामनंतविष्णुसंनिधौ॥बहिःसंध्यादशगुणागं
तपस्तत्रणेपुच॥ख्यातेनार्थेशतगुणाह्यनंतानाऽक्षयाफले॥शतानतपः॥अनंतमय
गंधंचरिरामैथुनमेवच॥पुनातिदयलस्यान्नेवहिःसंध्यासुपासिनेति॥यत्त्विचचनं॥

संध्यात्रयं तु कर्तव्यं द्विजेनात्मविशुद्धये ॥ उभे संध्ये तु कर्तव्ये ब्राह्मणेस्नगृहे ऽपि
ति ॥ तस्याशयः ॥ यद्यपि बहिरेव संध्यात्रयं प्रशस्तं तथापि यदा विहरणाद्यंगलो
पप्रसक्तिस्तथा श्रौतस्य विहरणस्याशक्यत्वात्तदनुरोधेन हे संध्ये गृहे अनुष्ठेये इ
ति ॥ ॥ इति संध्यादेशः ॥ ॥ अथ प्रयोगः ॥ आचम्याणायामं कुर्यात् ॥ तत्रेदं
नकः ॥ नासिकामंगुलीभिश्चतसृभिर्मध्यमानामिकाभ्यां दक्षिणेनसमारुध्य सव्येन तु वि
सर्जयेत् ॥ प्रणवव्याहृतीः सप्तगायत्रीं शिरसा सहावृत्तिः परेशयतनप्राणः प्राणायामः
सउच्यतेशक्तेर्नासाग्रदेशेसुमुखजेन्नतु वेगतः ॥ नकंपयेच्छरीरं तु स योगी परमो ॥३२॥
मतइति ॥ सएवं ॥ प्राणानायम्य विधिवद्दाग्यतः संयतेंद्रियः ॥ अथ संध्यामुपासि
ष्य इति संकल्प्य मार्जयेत् ॥ तिसृभिर्मार्जनं कुर्यादापो हीति कुशोदकैः ॥ पादेपादे

क्षिपेन्मूर्ध्नि त्रिप्रणवसंयुतांस्त्रिधानोनवप्रणवयुक्तेनआपोहिष्ठादिचेनच
संवत्सरुतंपापंमार्जनांनेविनश्यतीतिषडृतादमादौप्रणवइतिऋक्त्रयेनु
वप्रणवाः ॥ ब्रह्मापाद्याआपोहिष्ठादिभिः पादैः शिरस्यंसेचुविन्दुवः ॥ यस्यक्षयायेति
त्यधस्तात्क्षित्वाद्भिः परिषेचयेदितिसएवाधाराज्यतेनतोयेनसंध्योपास्तिर्वि
हितात्कथंतर्हिमार्जनंकार्यमित्यत्रसएवाहानयोनीर्थेकृदेवापिभाजनेमृन्म
यपिवा ॥ ओइंवरेवसोवर्णराजनेदारुसंभवे ॥ कृत्वानुवामहस्तेवासंध्योपास्तिंस
माचरेदिति ॥ ओइंवरंनाम्नपात्रंकृत्वेतिनलमितिशेषः ॥ यनुवचनांवामुहस्ते
जलंकृत्वायेनुसंध्यामुपासनेसासंध्याहवलीत्येवंअसु
रास्तैस्तुतर्पिताइतिनन्मन्यादिपात्रांतरसद्भावविषयांतरभावेनुकृत्वानुवामह

आ॰ क
॥३२॥

स्तरत्येनद्धोर्ध्यां॥अथमंत्राचमनंनत्रगृह्यपरिशिष्टं॥अथाचमनोदकमादायसू
र्यश्चेतिपिबेत्॥सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः॥पापेभ्योरक्षंतां॥म
ह्राच्चापमकार्षीन्मनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्ना॥रात्रिस्तदवलुंपतु
यत्किंचदुरितंमयि॥इदमहम्मामममयोनौ॥सूर्यज्योतिषिजुहोमिस्वाहेत्येतत्स
मंत्राचमनं॥अथमध्यदिने॥आपःपुनंत्वितिमंत्राचमनं॥आपःपुनंतुपृथिवीपृ
थिवीपूतापुनातुमां॥पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां॥यदुच्छिष्टमभोज्यंय ॥३२॥
द्वादुष्चरितंममासर्वंपुनंतुमामागोमतींचधियंदेहीत्येवं॥सायंविशेषः॥
सूर्यश्चेतिमंत्रेसूर्यस्थानेग्निपदंरात्रिपदस्थानेहःपदंसत्येज्योतिषिचोत्तरार्ध
तिं॥भगवांश्चाहसूर्यश्चेत्यनुवाकेनज्ञातःकालेपिबेदपः॥अग्निश्चेत्यनुवाकेनसायं

कालेपिबेदपः॥आपःपुनंतुमध्याह्नेसमंत्राचमनंचरेदिति॥सूर्यश्चेतिमंत्रस्याय
ज्ञवल्क्यउपनिषदृषिः॥सूर्यमन्युमन्युपतयोरात्रिश्चदेवताः॥गायत्रीपंक्तिश्छं
दोरात्रिसूक्तं॥रक्षंतामित्येतानुगायत्री॥दुरितंमयीत्येतानुपंक्तिः॥पंचपदापंक्तिरि
तिश्रुतेः॥स्वाहेत्येतादशाक्षरपादहोमेनाविराट्॥दशाक्षराविराड्भितिश्रुतेः॥
द्विपदाविराजस्त्यनुकमणिकाज्ञानश्चाप्तुनिश्छंदस्तिमदनपरिज्ञाने॥आपः
पुनंत्वित्यस्ययाज्ञवल्क्योपनिषदृषिः॥मनोनरेपुत्रऋषिः॥आपःपृथिवीब्रह्म
णस्पतिर्ब्रह्मदेवताअनुष्टुपछंदः॥ ॥इतिमंत्राचमनं॥ ॥अथद्वितीय
मार्जनंगृह्यपरिशिष्टे॥अथपुनराचम्यमार्जयेत्यणव्याहृतिसावित्रीभिरापो
हिष्ठेतिसूक्तेन॥गायत्रीशिरसाचोत्तमश्चात्मानंपरिषिंचेदेतन्मार्जनमिति॥भगवान्

आ॰ क
॥३३॥

प्रणवेनव्याहृतिभिर्गायत्र्याप्रणवाद्यया॥आपोहिष्ठेतिसूक्तेनमार्जनंहिचतुर्थकं॥
कात्यायनः॥प्रणवोभूर्भुवस्स्वरोमायत्रीचतृतीयका॥अद्भ्यःसंभवसेवमार्जनंहि
चतुर्थकमितिनिगमः॥प्रजापतिः॥कृतंनेमार्जनंकुर्यात्सादरेणसमाहितः॥अथवाचौतै
